श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ बिम्बप्रतिबिम्बपद्धतिः एकविंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ बिम्बप्रतिबिम्बपद्धतिः एकविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

शौरेः शुद्धान्तनारीणां विहारमणिदर्पणम्।
प्रसत्तेरिव संस्थानं पदत्राणमुपास्महे॥ २१.१ ॥

कमलापतिपादुके ! कदाचिद् विहगेन्द्रस्त्वयि बिम्बितो विभाति।
सविलासगतेऽपि रङ्गभर्तुः निजमात्मानमिवोपधातुकामः॥ २१.२ ॥

मणिपङ्क्तिषु ते दिशामधीशाः प्रतिबिम्बानि निजानि वीक्षमाणाः।
अभियन्ति मुकुन्दपादुके ! त्वां अधिकारान्तरसृष्टिशङ्कयेव॥ २१.३ ॥

मणिमौळिशतेन बिम्बितेन प्रणतानां परितः सुरासुराणाम्।
मुरभिन्मणिपादुके ! महिम्ना युगपत्तेषु समर्पितेव भासि॥ २१.४ ॥

उपनीतमुपायनं सुरेन्द्रैः प्रतिबिम्बच्छलतस्त्वयि प्रविष्टम्।
स्वयमेव किल प्रसादभूम्ना प्रतिगृह्णासि मुकुन्दपादुके ! त्वम्॥ २१.५ ॥

रङ्गेश्वरस्य नवपल्लवलोभनीयौ
    पादौ कथन्नु कठिना स्वयमुद्वहेयम्।
इत्याकलय्य नियतं मणिपादुके ! त्वं
    पद्मास्तरं वहसि तत्प्रतिबिम्बलक्षात्॥ २१.६ ॥

पादार्पणात् प्रथमतो हरिदश्मरम्ये
    मध्ये तव प्रतिफलन्मणिपादरक्षे !।
मन्ये निदर्शयति रङ्गपतिर्युगान्ते
    न्यग्रोधपत्रशयितं निजमेव रूपम्॥ २१.७ ॥

यात्रावसानमधिगच्छति रङ्गनाथे
    विश्राणयस्यनुपदं मणिपादुके ! त्वम्।

प्रायः प्रयाणसमये प्रतिबिम्बितानां
    तीर्थावगाहमपरं त्रिदशेश्वराणाम्॥ २१.८ ॥

उच्चावचेषु तव रत्नगणेषु मातः !
    वेधाः प्रयाणसमये प्रतिबिम्बिताङ्गः।
आशङ्कते मुरभिदो मणिपादुके ! त्वाम्
    आगामिकल्पकमलासनपङ्क्तिगर्भाम्॥ २१.९ ॥

आलोलरश्मिनियतां मणिपादुके ! त्वाम्
    आरुह्य सञ्चरति रङ्गपतौ सलीलम्।
अन्तःपुरेषु युगपत्सुदृशो भजन्ते
    डोळाधिरोहणरसं त्वयि बिम्बिताङ्ग्यः॥ २१.१० ॥

कालेषु राघवपदावनि ! भक्तिनम्रः
    कार्याणि देवि ! भरतो विनिवेदयंस्ते।
त्वद्रत्नबिम्बिततयाऽपि मुहुः स्वकीयां
    राजासनस्थितिमवेक्ष्य भृशं ललज्जे॥ २१.११ ॥

प्रत्यागते विजयिनि प्रथमे रघूणां
    विन्यस्यति त्वयि पदं मणिपादरक्षे !।
रत्नौघबिम्बितनिशाचरवानरां त्वां
    पूर्वक्षणस्थमिव पुष्पकमन्वपश्यन्॥ २१.१२ ॥

वैयाकुलीं शमयितुं जगतो वहन्त्या
    रक्षाधुरां रघुधुरन्धरपादरक्षे !।
प्राज्यं यशः प्रचुरचामरबिम्बलक्षात्
    प्रायस्त्वया कबळितं प्रतिभूपतीनाम्॥ २१.१३ ॥

प्रतिदिशमुपयाते देवि ! यात्रोत्सवार्थं
    त्वयि विहरणकाले बिम्बिते जीवलोके।
वहसि मणिगणैस्त्वं पादुके ! रङ्गभर्तुः
    कबळितसकलार्थां काञ्चिदन्यामवस्थाम्॥ २१.१४ ॥

भगवति गरुडस्थे वाहनस्थाः सुरेन्द्राः
त्वयि विनिहितपादे भूमिमेवाश्रयन्ति।
तदपि चरणरक्षे ! रत्नजाले त्वदीये
प्रतिफलितनिजाङ्गास्तुल्यवाहा भवन्ति॥ २१.१५ ॥

स्वच्छाकारां सुरयुवतयः स्वप्रतिच्छन्दलक्ष्यात्
गाहन्ते त्वां प्रणतिसमये पादुके ! साभिमानाः।
स्त्रीरत्नानां परिभवविधौ सृष्टिमात्रेण दक्षां
नीचैः कर्तुं नरसखमुनेरूर्वशीमूरुजाताम्॥ २१.१६ ॥

स्वेच्छाकेळिप्रियसहचरीं स्वच्छरत्नाभिरामाम्
स्थाने स्थाने निहितचरणो निर्विशन् रङ्गनाथः।
सञ्चारान्ते सह कमलया शेषशय्याधिरूढः
त्यक्त्वाऽपि त्वां त्यजति न पुनः स्वप्रतिच्छन्दलक्षात्॥ २१.१७ ॥

त्वामेवैकामधिगतवतः केळिसञ्चारकाले
पार्श्वे स्थित्वा विनिहितदृशोः पादुकेऽनन्यलक्ष्यम्।
त्वद्रत्नेषु प्रतिफलितयोर्नित्यलक्ष्यप्रसादा
पद्माभूम्योर्दिशति भवती पादसेवां मुरारेः॥ २१.१८ ॥

एकामेकः किल निरविशत्पादुके ! द्वारकायां
क्रीडायोगी कृतबहुतनुः षोडशस्त्रीसहस्रे।
शुद्धे देवि ! त्वदुपनिहिते बिम्बितो रत्नजाले
भुङ्क्ते नित्यं स खलु भवतीं भूमिकानां सहस्रैः॥ २१.१९ ॥

हरिपदनखेषु भवती प्रतिफलति तवैतदपि च रत्नेषु।
उचिता मिथः पदावनि ! बिम्बप्रतिबिम्बता युवयोः॥ २१.२० ॥

॥ इति श्रीपादुकासहस्रे बिम्बप्रतिबिम्बपद्धतिः एकविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥